शाता०जावा० । "प्रभाते चार्द्धराले वा स्नानं कुर्य्यात् परेऽहनि" भविष्य पुरा० । "अथार्द्धराले स्तिमितप्रदीपे" रघुः "मध्यन्दिनेऽर्द्धराले च श्राद्धं भुक्त्वा च सामिषम्" मनुः ।

**अर्द्धर्च** पु०न० अर्द्धम् ऋचः एकदेशित० अच् समा० । ऋचोऽर्द्धभागे "अर्द्धर्चेऽर्द्धर्चे प्रतिगृह्णीयात्" शत०ब्रा० । "ऋचः पादं मात्रया कल्पयन्तोऽर्द्धर्चेन" अथ० ९,१०,१९, अस्य परिमाणवाचकत्वात् वीप्सायां शस् । अर्द्धर्चशः । अर्द्धर्चमर्द्धर्चमिति वीप्सावृत्तौ कारकभूते अर्द्धर्चे "तस्य वाससा पाणिभ्यां पाणी संगृह्य सावित्रीमन्वाह पच्छोऽर्द्धर्चशः सर्वाम्" कात्या० १७,१,१८, "तस्मादर्द्धर्चशः शंसेत्" शत०ब्रा० "अथार्द्धर्चशो द्वौवा इमौ प्राणौ" शत०ब्रा० ।

**अर्द्धर्चादि** पु० ६त० । "अर्द्धर्चाः पुंसि चेति" पाणिन्युक्ते पुंनपुंसकलिङ्गानुशासननिमित्ते शब्दसमूहे सच गणः १२, १४ पृष्ठे दर्शितः ।

**अर्द्धलक्ष्मीहरि** अर्द्धं लक्ष्म्या आकारेऽस्य तादृशो हरिः । लक्ष्मीनारायणात्मके विष्णोर्मूर्त्तिभेदे तद्रूपं यथा "उद्यत् प्रद्योतनशतरुचिं तप्तहेमावदातं पार्श्वद्वन्द्वे जलधिसुतया विश्वधात्र्या च जुष्टम् । नानारत्नोत्कलितविविधाकल्पमापीतवस्त्रं विष्णुं वन्दे दरकमलकौमोदकीचक्रपाणिमिति"

**अर्द्धविसर्ग** पु० अर्द्धं विसर्गस्य तद्व्यञ्जकत्वादुपचारः । विसर्गसदृशाकारार्द्धरेखया व्यञ्जनीये कखयोःपरत जिह्वामूलीयाख्ये पफयोःपरतः उपाध्मानीयाख्ये च वर्णभेदे अर्द्धविसर्जनीयादयोऽप्यत्र ।

**अर्द्धवीक्षण** न०अर्द्धमसंपूर्णं वीक्षणम् । कटाक्षदर्शने ।

**अर्द्धवैनाशिक** पु० अर्द्धोऽसम्पूर्णः वैनाशिकः बौद्धभेदः । वैशेषिकशास्त्रकारे तस्य च सर्वस्य क्षणिकतावादितया वैनाशिकसमयवत् परिणामभेदेन देहादेराशुविनाशस्वीकारेण आत्मनस्तु स्थायित्वाङ्गीकारेण च ततो वैलक्षण्यात् अर्द्धवैनाशिकत्वम् इति वेदान्तिनो वदन्ति । वैशेषिकादयस्तु वेदान्तिनोऽर्द्धवैनाशिकत्वं कल्पयन्ति "तर्हि वैनाशिकवत् सर्वेषां पदार्थानां चिद्रूपज्ञानमात्रात्मकतया स्वीकारेण चितश्च स्थायित्वाङ्गीकारमात्रेण ततो वैलक्षण्यमित्यर्द्धवैनाशिकत्वमिति । यथा च नैषां तथात्वं तथा विवरणप्रमेयोपन्यासे प्रपञ्चितम् विद्यारण्येन ।

**अर्द्धवैशस** न० अर्द्धस्य वैशसं वधः । अर्द्धवधे "विधिना कृतमर्द्धवैशसम् "अर्द्धो वा आत्मनो यत् पत्नी" इति श्रुतेस्तस्य नाशे पत्न्या अर्द्धनाशोयुक्त इति तथोक्तम् ।

**अर्द्धशत** न० अर्द्धं शतस्य एकदे०त० । १पञ्चाशत्संख्यायां २तत्संख्यान्विते च । "वैश्योऽप्यर्द्धशतं द्वे च" मनुः । क्वचित् द्वित० । तत्रैवार्थे न० एतच्छतार्द्धमावर्त्त्य त्रैलोक्यविजयी भवेत्" तन्त्रम् । [शनमप्यत्र । ]

**अर्द्धशन** एकदेशित० शक०। अर्द्धभोजने रत्नावली० अर्द्धा-

**अर्द्धशफर** पु०अर्द्धः शफरः । (दाड़का) इति ख्याते मत्स्यभेदे

**अर्द्धश्लोक** पु० अर्द्धं श्लोकस्य एकदेशित० । श्लोकस्यार्द्धे प्रथम पादद्वये

**अर्द्धसम** त्रि०अर्द्धेन समः । १अर्द्धेन तुल्ये पदार्थे "प्रथमाङ्घ्रिसमो यस्य तृतीयश्चरणोभवेत् द्वितीयस्तुर्य्यवद्वृत्तं तदर्द्धसममुच्यते" वृत्तरत्नाकरोक्ते २वृत्तभेदे न० यथा "अयुजि न युगरेफतोयकारो युजि च नजौ जरगाश्च पुष्पिताग्रा" एवमुपचितादीनि ।

**अर्द्धसीरिन्** पु० अर्द्धं सीरस्य हलकृष्टशस्यादिफलस्य सोऽस्यास्ति इनि १हलसाध्यकलशस्यस्यार्द्धभाजि । "शूद्रेषु दासगोपालकुलमित्रार्द्धसीरिणः । भोज्यान्ना नापितश्चैव यश्चात्मानं निवेदयत्" या०स्मृतिः अत्र निरुक्तार्थपरत्वम् मिताक्षराकृतोक्तं पराशरेण तु तस्य पारिभाषिकत्वम् दर्शितं यथा" दासनापितगोपालकुलामित्रार्द्धसीरिणः एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत्" इत्युक्त्वा "वैश्यकन्यासमुत्पन्नो ब्राह्मणेन तु संस्कृतः । आर्द्धिकः स तु विज्ञेयो भोज्यं विप्रैर्न संशयः" इत्युक्तम् तेन वैश्यागर्भजो ब्राह्मणेनोत्पादितः संस्कारवान् वर्णसङ्करभेदः आर्द्धिकः अर्द्धसीरीति । तेन २तदर्थेऽपि ।

**अर्द्धहार** पु०ऋध—वृद्धौ अच् अर्द्धः सम्पन्नः हारः । चतुःषष्टिलतिके हारभेदे ।

**अर्द्धांश** पु० एकदेशित० । अंशस्य सजातीयोचितभागस्य १तुल्यार्द्धभागे २सर्वद्रव्यस्यार्द्धभागे च ।

**अर्द्धार्द्ध** पु० अर्द्धम् अर्द्धस्य तुल्यांशस्य एक० त० । तुल्यभागरूपस्यांशस्य तुल्ये अर्द्धभागे चतुर्थांशे । "चरोरर्द्धार्द्धभागाभ्यां तामयोजयतामुभे" रघुः । "पञ्चाधिकस्य वा नाशे ततोऽर्द्धार्द्धे तु तण्डुलाः ततोऽर्द्धार्द्धविनाशे तु स्पृशेत् पुत्रादिमस्तकम्" । काश्या० स्मृ० ।

**अर्द्धासन** न०अर्द्धमासनस्य । आसनस्यार्द्धभागे "यो विसर्जनावसरे मम हि दिवौकसां समक्षमर्द्धासनोपवेशितस्य" शकु० । "अर्द्धासनं गोत्रभिदाधितष्ठौ" रघुः । "अर्द्धासनं गोत्रभिदोऽध्यवात्सीत्" भट्टिः । अर्द्धं सम्यक्मसनं त्यागः विक्षेपश्च । २स्नेहेन दाने ३अकृतसने च धरणिः ।

**अर्द्धिक** त्रि०अर्द्धमर्हति टिठन् स्त्रियां ङीप् । १अर्द्धभागार्हे